अथ हिरण्यकेशी दर्शपूर्णमास हौत्र प्रारंभः ॥ ६९ ॥

रा० अ० जोशी.

॥श्री गणेशायनमः॥ अथ याजुष हौत्र प्रारंभः॥ कूसे होतृषदने होतरेहीत्युक्ते होता विहारात्प्रा
ग्बहिर्यज्ञोपवीती भूत्वोपविश्य॥ देवायो अप्सुमाहिम इषवः स इदमापः प्रवहत य त्किं
चे दुरितंमयि॥ यच्चाहमभि दुद्रोह यच्च शेप उदाकृतं॥ इति सकृदप आचामति॥
ततः शुद्ध्यर्थं स्मार्तावृताप आचम्य विहारमभ्येति॥ भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रप
द्ये भूर्भुवः सुवः प्रपद्ये सत्यं प्रपद्य ऋतं प्रपद्ये मृतं प्रपद्ये प्रजापतेः प्रियां तनुवमनार्तां
प्रपद्येगायत्रीं प्रपद्ये त्रिष्टुभं प्रपद्ये जगतीं प्रपद्ये नुष्टुभं प्रपद्ये पङ्क्तिं प्रपद्ये॥ इत्यंतरेणवे
द्युत्तरौ प्रपद्योत्तरेण वेदिं प्राङ्मुखो वस्थाय॥ छंदोभिश्छादये छंदोभिश्छंनोस्मि॥ इति
तिष्ठनेव जपति॥ इदमहं पंचदशेन वज्रेण द्विषंतं भ्रातृव्यमवक्रामामि योस्मान्द्वेष्टि यं
चवयंद्विष्मः॥ इति दक्षिणेन पादेनोत्तरां वेदिश्रोणि मवक्रामति॥ निगदसमाप्त्यंतंति
ष्ठति॥ अपउपस्पृश्य॥ अग्नये समिध्यमानायानुब्रूहीत्युक्ते ब्रह्मन्सामिधेनीरनुव
क्ष्यामि॥ इति ब्रह्माणमामंत्रयते॥ ब्रह्मणा ओमनुब्रूहीत्युक्ते न्हृदयदेशे जलिं कृत्वानु
ब्रूयान्मंद्रस्वरेण॥ चित्तिस्रुक्॥ चित्तमाज्यं॥ वाग्वेदिः॥ आधीतंबर्हिः॥ केतो
अग्निः॥ विज्ञातमग्निः॥ वाग्पतिर्होता॥ मनउपवक्ता॥ प्राणो हविः॥ सामाध्वर्युः॥ इ
त्युक्त्वा॥ भूर्भुवः सुवः॥ इति व्याहृतीर्वदति॥ एतदंतं मंद्रस्वरेणोक्त्वा॥ हिं हिं हिं॥
इति मंद्रस्वरेण त्रिर्हिंकृत्य मध्यमेन स्वरेण सामिधेनीरनुब्रूयात्॥ प्रवो वाजा अभि

घयेहविष्मंतो घृताच्या देवां जिगाति सुम्नयो ३ म् ॥ प्रवोवाजा अ॰ यो ३ म ॥ प्रवोवाजा
अ॰ यो ३ मग्न आयाहि वीतये गृणानो हव्य दातये ॥ निहोता सत्सि बर्हिषों ३ तंत्वा समि
द्भिरंगिरः घृतेन वर्धयामसि ॥ बृहच्छोचाय विष्ठ्यों ३ ँ सनः पृथुश्रवाय्यमच्छादेव
विवाससि ॥ बृहदग्नेसुवीर्यो ३ मीडेन्योनमस्यस्तिरस्तमाँ ँसि दर्शतः ॥ समग्निरिध्य
तेवृषों ३ वृषो अग्निः समिध्यते श्वोन देव वाहनः ॥ तँ ँ हविष्मंत ईडतों ३ वृषणंत्वा
वयंवृषन्वृषाणः समिधीमहि ॥ अग्ने दीधतं बृहो ३ मग्निं दूतं वृणीमहे होतारं विश्ववे
दसं ॥ अस्य यज्ञस्य सुक्रतो ३ ँ समिध्यमानो अध्वरेग्निः पावक ईड्यः ॥ शोचि
ष्केशस्तमीमहो ३ ँ समिद्धो अग्न आहुत देवान्यक्षिस्वध्वर ॥ त्वँ ँ हि हव्यवा
डसो ३ माजुहोत दुवस्यताग्निं प्रयत्यध्वरे वृणीध्वँ ँ हव्य वाहनो ३ म् ॥ आजुहो
त दुवस्यताग्निं॰ हनोम् ॥ आजुहोतदुवस्यताग्निं॰ हनो ३ मग्नेमहाँ ँ असि ब्राह्मण
भारत ॥ आंगिरस्स पौरुकुत्स त्रासदस्येति ब्रूयात् ॥ देवेद्धो मन्विद्ध ऋषिष्टुतो वि
प्रानुमदितः कविशस्तो ब्रह्मसँ ँ शितो घृताहवनः ॥ अवसाय ॥ प्रणीर्यज्ञानाँ ँ र
थीरध्वराणामतूर्तो होता तूर्णिर्हव्यवाट् ॥ अवसाय ॥ आस्पात्रं जुहूर्देवानां चमसो
देवपानो राँ ँ इवाग्ने नेमिर्देवाँ ँस्त्वंपरिभूरस्या वह देवान्यजमानाय ॥ अग्नि

मग्न आ ३ वह ॥ सोममा ३ वह ॥ अग्निमा ३ वह ॥ प्रजापतिं ॥ उपांशु ॥ आ ३
वह ॥ इत्युच्चैः ॥ अग्नीषोमावा ३ वह ॥ इंद्रं वैमृधमा ३ वह ॥ देवा ँ आज्य
पा ँ आ ३ वह ॥ इति पौर्णमास्यां ॥ अग्निमग्न आ ३ वह ॥ सोममा ३ वह ॥
अग्निमा ३ वह ॥ इंद्राग्नी आ ३ वह ॥ इत्यमावास्यां ॥ देवा ँ आज्यपा ँ
आ ३ वह ॥ अग्नि ँ होत्राया वह स्वं महिमानमा ३ वह ॥ आ चाग्ने देवान्वह
सुयजा च यज जातवेदः ॥ इत्युक्त्वा तथैवोर्ध्वज्ञुरुपविशति ॥ असौ मानुष
इति श्रुत्वा तूष्णीमुपोत्थाय ॥ अभिमर्शनार्थं आस्तृत बर्हिषः कुत्रचित्तृणा
नि किंचिदपसार्य ॥ नमो मात्रे पृथिव्यै ॥ पृथिवीमभिमृशति ॥ ततोपसा
रितानि तृणानि पुनः प्रसार्य ॥ पृथिवी होता ॥ द्यौरध्वर्युः ॥ रुद्रोग्नीत् ॥ बृह
स्पतिरुपवक्ता ॥ अग्निर्होता ॥ अश्विनाध्वर्यू ॥ त्वष्टाग्नीत् ॥ मित्र उपवक्ता ॥
सूर्यं ते चक्षुः ॥ वातं प्राणः ॥ द्यां पृष्ठं ॥ अंतरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृथिवी
ँ शरीरैः ॥ महाहविर्होता ॥ सत्यहविरध्वर्युः ॥ अच्युतपाजा अग्नीत् ॥
अच्युतमना उपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरो ॥ अया
स्य उद्गाता ॥ इति चतुर्होतारं पंचहोतारं षड्ढोतारं सप्तहोतारं च जपित्वा ॥ इंद्रं
मन्वा रभामहे होतृवर्यै पुरोहितं ॥ येनायन्नुत्तमं ँ स्वर्देवा अंगिरसो दिवं ॥

इति दक्षिणहस्तेनाध्वर्युमन्वारभंते सव्येन तूष्णीमाग्नीध्रं ॥ अंस इतिसूत्रांतरे ॥
तूष्णीमंतरेणाध्वर्युमाग्नीध्रंच प्राग् गत्वा ॥ ब्रष्टिश्चाध्वर्योनवतिश्च पाशा अ
ध्वर्युमग्निमंतरा वियत्ताः ॥ सिनं तिपाक मतिधीरएभ्यूर्तस्यपंथा मन्वैमि होता ॥
पृथिवीहोता ॥ द्यौरध्वर्युः ॥ रुद्रोग्नीत ॥ बृहस्पतिरुपवक्ता ॥ अग्निर्होता ॥ अश्वि
नाध्वर्यु ॥ त्वष्टाग्नीत् ॥ मित्रउपवक्ता ॥ सूर्यंतेचक्षुः ॥ वातंप्राणः ॥ द्यांपृष्ठं ॥
अंतरिक्षमात्मा ॥ अंगैर्यज्ञं ॥ पृथिवीं शरीरैः ॥ महाहविर्होता ॥ सत्यहविरध्व
र्युः ॥ अच्युतपाजा अग्नीत् ॥ अच्युतमनाउपवक्ता ॥ अनाधृष्यश्चाप्रतिधृष्यश्च
यज्ञस्याभिगरो ॥ अयास्यउद्गाता ॥ समुद्रंमावपहं ॥ इत्येतैर्मंत्रैरंतरेणाहव
नीयमध्वर्युंचप्रत्यङेति ॥ आदित्यस्यावृतमन्वावर्ते ॥ इतिस्वासनात्पश्चा
त्प्रदक्षिणमन्वावर्ते ॥ षण्मोर्वीरंहसस्पांतु द्यौश्च पृथिवीश्चाहश्च रात्रिश्च
कृषिश्च वृष्टिश्च त्विषिश्चापचितिश्चापश्चौषधयश्च ॥ इतिजपित्वा ॥ निर
स्तः परावसुः ॥ इति होतृषदनात्तृणं निरस्य ॥ अपउपस्पृश्य ॥ येनः सपत्ना
अपते भवंत्विंद्राग्निभ्यामवबाधामहेतान् ॥ वसवोरुद्रा आदित्याउपरिस्पृशं
मोग्रंचेत्तारमधिराजमक्रन् ॥ इति होतृषदनं दक्षिणहस्तेनावबाधते ॥
अभ्युक्ष्य होतृषदनं ॥ उन्निवतउदुद्वतश्चगेषंपातं मा द्यावापृथिवी अद्यान्हः ॥

सीद होतः स्वउ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ ॥ देवावीर्देवान्हविषा य
जास्यग्ने बृहद्यजमाने वयो धाः ॥ इति द्वाभ्यां होतृषदने उपविशति ॥ निहोता होतृषद
ने विदानस्त्वेषो दीदिवाꣳ असदत्सुदक्षः ॥ अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शु
चिजिह्वो अग्निः ॥ इत्यासीनो जपति ॥ लोककृतौ लोकं मे कृणुतं मा मा संताप्तमेष वां
लोकः ॥ इति गार्हपत्याहवनीयौ समीक्षते ॥ सकृन्मंत्रः ॥ प्र पैभ्रूत भागधेयं यथा वो
येन पथा हव्यमा वो वहामि जुष्टो मृत्य देवेभ्यो वाचेमु घासं जुष्टां अक्षभ्यो जुष्टां नारा
शꣳसाय ॥ इति देवता उपतिष्ठते ॥ अग्निर्होतावेत्वग्निर्होत्रं वेत्तु प्रावित्रꣳ स्मो वयꣳ
साधु ते यजमान देवता ॥ घृतवती मध्वर्यो स्रुचमास्यस्व देवायुवं विश्ववारा मीडा
महै देवाꣳ ईडेन्यान्नमस्याम नमस्यान्यजाम यज्ञियान् ॥ इति स्रुगादापन निगदं ब्रू
यात् ॥ अध्वर्योः पुरोनुवाक्याप्रैषानंतरं पुरोनुवाक्यां याज्याप्रैषानंतरं याज्यां ब्रू
यात्सर्वत्र ॥ समिधो यजेत्युक्ते ॥ ये ३ यजामहे भूर्भुवः सुवः समिधो अग्न आ-
ज्यस्य वियंतु ३ वौ ३ षट् ॥ इति प्रथमप्रयाजं ब्रूयात् ॥ याज्यास्वरतो वषट्कार
उच्चैस्स्वरः ॥ उपांशुस्वरे उच्चैः ॥ ततः वषट् कृत्य वषट्कृत्य प्राण्यापान्यनिमिषेत् ॥
प्राण्यश्वासं कृत्वा अपान्यश्वासं गृहीत्वा किंचिन्नेत्रोन्मिलनं कुर्यात् ॥ वागोजः स
ह ओजो वाग्वषट्कार नमस्ते अस्तु मा मा हिꣳसीः ॥ इति वषट्कारमनुमंत्रयते ॥

झि

॥ ३ ॥.

एवं प्रतिवषट्कारं ॥ ये ३ यजा॰ सुवस्तनूनपादग्न आज्यस्य वेतु ३ वौ ३ षट् ॥ ये ३
य॰ सुवरिडो अग्न आज्यस्य वियंतु ३ वौ ३ षट् ॥ ये ३ यजा॰ सुव बर्हिरग्न आज्य
स्य वेतु वौ ३ षट् ॥ ये ३ यजा॰ सुवः स्वाहाग्निं ॒ स्वाहा सोम ॒ स्वाहाग्निं ॒ स्वा
हा इत्युच्चै ॥ प्रजापतिं ॥ इत्युपांशु ॥ तत उच्चैः ॥ स्वाहाग्नीषोमौ स्वाहेंद्रं वै
मृध ॒ स्वाहा देवा ॒ आज्यपान्स्वाहाग्निं ॒ होत्रा ञ्जुषाणा अग्न आज्यस्य वि
यंतु ३ वौषट् ॥ इति पौर्णमास्यां ॥ अमावास्यायांतु ॥ ये ३ यजा॰ सुवस्वा
हाग्निं ॒ स्वाहा सोम ॒ स्वाहाग्निं ॒ स्वाहेंद्राग्नी स्वाहा देवा ॒ आज्यपान्स्वा
हेत्यादि अस्सन्नयतः ॥ अथाज्यभागौ ॥ अग्निर्वृत्राणि जंघनद्द्रविणस्युर्वि
पन्यया ॥ समिद्धः शुक्र आहुतो ३म् ॥ ये ३ हे ग्निं भू॰ वर्जुषाणो अग्निराज्यस्य
वेतु ३ वौषट् ॥ त्व ॒ सोमासि सत्पतिस्त्व ॒ राजोत वृत्रहा ॥ त्वं भद्रो असि क्र
तो ३म् ॥ ये ३ हे सोमं भू॰ वर्जुषाणः सोम आज्यस्य हविषो वेतु ३ वौ ३ षट् ॥ इति
पौर्णमास्यां ॥ अग्निः प्रत्नेन जन्मना शुंभानस्तनुव ॒ स्वां ॥ कविर्विप्रेण वावृधो
३म् ॥ ये ३ ॰ वर्जुषाणो अग्निराज्यस्य वेतु ३ वौ ३ षट् ॥ सोम गीर्भिष्ट्वा व
यं वर्धयामो वचोविदः ॥ सुमृडीको न आविशो ३म् ॥ ये ३ ॰ वर्जुषाणः सोम

आज्यस्य हविषो वेत्‌ ३ वौषट्‌ ॥ इति वृधन्वंतावमावास्यायां ॥ आज्यभागयोर्मंद्रो
मध्यमो वा स्वरः ॥ अथ प्रधानस्य मध्यम एव स्वरः ॥ अग्निर्मूर्धा दिवः ककुत्पतिः पृथि
व्या अयं ॥ अपाꣳ रेताꣳसि जिन्वतो ३ म्‌ ॥ ये ३ यजामहे ग्निं भूर्भुवः सुव र्भुवो
यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ॥ दिवि मूर्धानं दधि
षे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहां ३ वौ षट्‌ ॥ प्रजापते नत्वदेतांन्यन्यो वि-
श्वा जातानि परिता बभूव ॥ यत्कामास्ते जुहुमस्तंनो अस्तु वयꣳ स्याम पतयो
रयीणां ॥ इत्युपांशु ॥ ओ ३ म्‌ ॥ इत्युच्चैः ॥ ये ३ यजामहे ॥ इत्युच्चैः ॥ अथोपांशु
॥ प्रजापतिं भू० वः स वेद पुत्रः पितरꣳ स मातरꣳ स सूनुर्भुवत्स भुवत्पुनर्मघः ॥
स द्यामौर्णोदंतरिक्षꣳ स सुवः स विश्वा भुवो अभवत्स आभवात्‌ ॥ इत्युपांशु ॥
वौ ३ षट्‌ ॥ इत्युच्चैः ॥ अग्नीषोमा सवेदसा सहूती वनतं गिरः ॥ सं देवत्रा बभूव थो ३ म्‌
॥ ये ३ यजामहे ग्नीषोमौ भूर्भुवः सुवर्युवमेतानि दिवि रोचनान्यग्निश्च सोम
सक्रतू अधत्तं ॥ युवꣳ सिंधूꣳ रभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीता
३ न्वौ ३ षट्‌ ॥ इंद्रं वै मृधस्य समानतंत्रत्वे ॥ विन इंद्र मृधो जहि नीचा यच्छ
पृतन्यतः ॥ अधस्पदं तमीं कृधि यो अस्माꣳ अभिदासतो ३ म्‌ ॥ ये ३ य०
ह इंद्रं वै मृधं भू भुर्वः सुवरिंद्र क्षत्रमभिवाममोजो जायथा वृषभ चर्षणीनां ॥

अपानुदो जनममित्रयंतमुरुं देवेभ्यो अकृणोरुलोकां ३ वौ ३षट् ॥ इति पौर्णमा
स्यां ॥ अमावास्यायांतु ॥ आग्नेययागानंतरं ॥ इंद्राग्नी रोचना दिवः परिबाजेषु
भूषथः। तद्वांचेति प्रवीर्यो ३म् ॥ ये ३ यः ह इंद्राग्नी भूर्भुवः सुवः श्नथद्वृत्रमुत
सनोति वाज मिंद्राग्नी सहुरी सपर्यत् ॥ इरज्यंता वसव्यस्य भूरेः सहस्तमा
सहसावाजयंता ३ वौ ३षट् ॥ अमावास्यायामुपांशुयाजः ॥ अथ स्विष्टकृत् ॥ इ
त आरभ्य शंयुवाकांत उत्तमस्वरः ॥ पिप्रीहि देवां उशतो यविष्ठ विद्वां ऋतूं
ऋतुपते यजेह ॥ ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतृणामस्यायजिष्ठो ३म्॥
ये ३ हे ग्निं स्विष्टकृतं भूर्भुवः सुवरयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रि
या धामान्ययाडग्नेः प्रिया धामान्ययाट् इत्युच्चैः ॥ प्रजापतेः ॥ इत्युपांशु ॥ अथो
च्चैः ॥ प्रियाधामान्ययाडग्नीषोमयोः प्रियाधामान्ययाडिंद्रस्यवै मृधस्य प्रियाधा
मान्ययाद्देवानामाज्यपानां प्रियाधामानि यक्षदग्ने होतुः प्रियाधामानि यक्षत्स्वं
महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदाजुषतां हविः अग्ने य
दद्य विशो अध्वरस्य होतः पावक शोचे वेष्ट्वं हि यज्वा ॥ ऋता यजासि महिना वि
यद्भूर्हव्या वह यविष्ठ याते अद्य ३ वौषट् ॥ इति पौर्णमास्यां ॥ अमावास्यायांतु ॥

ये ३ य० हेग्नि ँ स्विष्टकृतं भूर्भुवः सुवरथाऽग्निरग्नेः प्रिया० सोमस्य प्रि० ऽग्नेः प्रिया० ऽिंद्रा
ग्नियोः प्रिया धामान्ययाड्देवा नामित्यादि० ॥ अध्वर्युणात्ते अंगुलीपर्वणी तूष्णीमवघ्रा
यापउपस्पृशति ॥ अध्वर्युणांतरेणांगुष्ठप्रादेशिनींच लेपादुपस्तरणे कृते स्वयमध्यतो
द्विरादत्ते अध्वर्युर्वा द्विरादत्ते अध्वर्युर्वाद्विर्दधात् ॥ ततो ध्वर्युणा लेपे नाभिघारणे कृ
तेंगुलिभिर्गृण्हाति ॥ ततो मुखसंमितां इडां हस्ताभ्यां धृत्वोप० हूयते ॥ उपहूत ँ रथं
तर ँ सहपृथिव्योपमा रथंतर ँ सहपृथिव्या० हूयतामुपहूतं वामदेव्य ँ सहांतरिक्षे
णोपमा वामदेव्य ँ सहांतरिक्षेण० हूयतामुपहूतं बृहत्सह दिवोपमा बृहत्सह दिवा० हू
यतामुपहूताः सप्तहोत्रा उपमास्सप्तहोत्रा० हूयंतामुपहूता धेनुः सहर्षभोपमा धेनुः स
हर्षभा० हूयतामुपहूतो भक्षः सखोपमा भक्षः सखा० हूयतामुपहूतां ३ हो ॥ इत्युपांशु
उक्त्वा ॥ उपहूतेडोपहूतेडोपो अस्मा ँ इडा० हूयतामुपहूतेडोपहूतेडा ॥ मानवी घृत
पदी मैत्रावरुणी ब्रह्मदेवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहूता मनुष्याः ॥
य इमं यज्ञमवान्ये यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी देवी देवपु
त्रे ॥ उपहूतोयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण उपहूतो
दिव्ये धामन्नुपहूत इदं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूतो विश्वमस्य प्रियमुपहूतं

विश्वस्य प्रियस्योपहूतस्योपहूतः ॥ इत्युक्तो रुपह्नयते ॥ उपहूतायामवांतरेडां प्राश्नं
ति ॥ वाचस्पतये त्वा हुतं प्राश्नामि ॥ इडासि स्योनासि स्योन कृत्स्ना नो रायस्पोषे
सुप्रजास्त्वेधाः ॥ मुखस्य त्वा धुम्नाय सुरभ्या स्यत्वाय त्वा प्राश्नामि ॥ इति इडाभा
गं प्राश्नामि ॥ शुध्यर्थमाचम्य ॥ मनोज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं
दधातु ॥ बृहस्पतिस्तनुतामिमन्नो विश्वेदेवा इहमादयंतां ॥ इत्यंतर्वेदि पवित्रव
ति प्रस्तरदेशे मार्जयंते ॥ ततः स्वस्थान उपविश्य ॥ चतुर्धाकरणिके होतृभागे द
त्ते ॥ पृथिव्यै भागोसि ॥ इतितं प्राश्नामि ॥ शुध्यर्थमाचम्य स्वस्थाने उपविशेत् ॥
दक्षिणत एत ब्राह्मणा अयं व ओदनो यथा भागं प्रतिगृण्हीध्वमिति यजमाने नोक्ते आह
वनीयमग्रेण दक्षिणतो गत्वा सप्तदश कृत्वोपात्य ॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बा
हुभ्यां पूष्णो हस्ताभ्यां प्रतिगृण्हामि राजा त्वा वरुणो नयतु देवि दक्षिणे ब्रह्मण ओदनं तेना
मृतत्वमस्यां वयो दात्रे भूयान्मयो मह्यमस्तु प्रतिग्रहीत्रे क इदं कस्मा अदात्कामः कामा
य कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृण्हामि कामै
तत्त एषा ते काम दक्षिणोत्तानस्त्वांगीरसः प्रतिगृण्हातु ॥ इत्यन्वाहार्यं प्रतिगृह्य प्रत्ये
त्य स्वस्थाने उपविश्यानूयाजादि प्रतिपद्यते नानूयाजेषु ये यजामहं करोति ॥ देवा
न्यजेति संप्रेषिते ॥ भूर्भुवः सुवर्देवं बर्हिर्वसुवने वसुधेयस्य वेतु ३ वौ ३ षट् ॥

भूर्भुवः सुवर्देवो न राश ँ सो वसुवने वसुधेयस्य वेतु ३ वौ ३ षट् ॥ भूर्भुवः सुवर्देवो
अग्निः स्विष्टकृत्सुद्रविणा मंद्रः कविः सत्यमन्मा यजी होता होतुर्होतुरायजीयानग्ने
यां देवानयाड्या ँ अपिप्रेर्ये ते होत्रे अमत्सत ता ँ ससनुषी ँ होत्रां देवंगमां दिविदे
वेषु यज्ञमेरयेम ँ स्विष्टकृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वीहि ३ वौ ३
षट् ॥ अनवानमुत्तममनूयाजं यजति ॥ सूक्ता ब्रूहीति संप्रेषिते ॥ इदं द्यावापृथिवी
भद्रमभूदार्ध्म सूक्तवाकमुत नमोवाकमृध्यास्म सूक्तोच्यमग्ने त्व ँ सूक्तवागसि ॥
उपश्रितो दिवः पृथिव्योरोमन्वती तेस्मिन्यज्ञे यजमान द्यावापृथिवीस्तां ॥ शंगयेजी
रदानू अत्रस्नू अप्रवेदे उरुगव्यूती अभयंकृतौ ॥ वृष्टिद्यावारीत्यापा शं भुवौ मयो
भुवावूर्जस्वती च पयस्वती च सूपचरणा च स्वधिचरणा च तयोराविदि ॥ अग्नि
रिद ँ हविरजुषतावीवृधत महो ज्यायो कृत ॥ सोम इद ँ ह० कृत ॥ अग्निरिद० कृत ॥
प्रजापतिः ॥ इत्युपांशु ॥ इद ँ हविः ॥ इत्युच्चैः ॥ अजुषतावीवृधत ॥ इत्युपांशु ॥ महो
ज्यायः ॥ इत्युच्चैः ॥ अकृत ॥ इत्युपांशु ॥ अग्नीषोमाविद ँ हविरजुषेतामवीवृधेतां महो
ज्यायोक्रातां ॥ इंद्रं वैमृध इद ँ हवि० कृत ॥ देवा आज्यपा आज्यमजुषंतावीवृधंत महो
ज्यायोक्रत ॥ अग्निर्होत्रेणेद ँ ह० कृत ॥ अस्यामृधद्धोत्रायां देवंगमायामाशास्तेयं

यजमानः॥ विश्वनाथशर्मा॥ कृत्तिकाशर्मा॥ आयुराशास्ते सुप्रजास्त्वमाशास्ते
सजातवनस्यामाशास्ते ~~संम~~ उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशा
स्ते दिव्यं धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषा शास्ते तदश्यात्तदृध्या
त्तदस्मै देवा रासंतां तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः॥ इष्टं च वीतं चोभे
च नो द्यावापृथिवी अंꣳहसस्पातामिह गतिर्वामस्येदं च नमो देवेभ्यः॥ अथ अ
मावास्यां॥ अग्निरिदꣳ ह० कृत॥ सोमइद० कृत॥ अग्निरिदꣳ० कृत॥ इंद्राग्नी
इदꣳ हविरजुषेतामवीवृधेतां महोज्यायोक्रातां॥ देवा आज्यपा० इत्यादि॥ इति
अमावास्या॥ इति सूक्तवाकं प्रतिपद्यते॥ शं योर्ब्रूहीति संप्रेषिते॥ तच्छं यो रावृणी
महे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्ति रस्तु नः स्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वं जिगा
तु भेषजꣳ शंनो अस्तु द्विपदे शं चतुष्पदे॥ इति शंयुवाकं प्रतिपद्यते॥ शंयुवाकमुक्त्वा
हविः शेषं प्राश्नंति॥ पत्नी संयाजेषु वेदं तूष्णीमादाय प्रत्यङ्ङत्यापरेण गार्हपत्यमुप
विश्योर्ध्वज्ञुरासीनो वा पत्नीः संयाजयंत्युपांशु ध्वानेन वा॥ करणवदशब्दमनतः
प्रयोगः उपांशु॥ अक्षरव्यंजनानामनुपलब्धिर्ध्वनिं॥ आप्यायस्व समेतु ते विश्वतः
सोमवृष्णियं॥ भवा वाजस्य संगथे॥ ३ प्र॥ ये० य० हे सोमं भूर्भुवः सुवः संते पयाꣳ

स्मिसमुयंतुवाजाः संवृष्णियान्यभिमातिषाहः ॥ आप्यायमानो अमृताय सोम दिविश्रवाꣳस्युत्तमानिधि
ष्वा ३ वौ ३ षट् ॥ इहत्वष्टारमग्रियं विश्वरूपमुप० हृये ॥ अस्माकमस्तु केवलो ३म् ॥ ये ३ यजा० हे
त्वष्टारं भूर्भुवः सुवस्तंनस्तुरीपमधपोषयित्नुदेवत्वष्टर्विरराणः स्यस्व ॥ यतो वीरः कर्मण्यः
सुदक्षोयुक्तग्रावाजायतेदेवकामा ३ वौ ३ षट् ॥ देवानांपत्नीरुशतीरवंतु नः प्रावंतुनस्तुजये
वाजसातये ॥ याः पार्थिवासोया अपामपिव्रतेतानो देवीः सुहवाः शर्मयच्छतो ३म् ॥ ये० हे
देवानां पत्नीर्भूर्भुवः सुवरुतग्नाव्यंतुदेवपत्नीरिंद्राण्यग्नाय्यश्विनीराट् ॥ आरोदसीवरुणा
नीश्रृणोतुव्यंतुदेवीर्यऋतुर्जनीनाम् ३ वौ ३ षट् ॥ राकामहꣳ सुहवाꣳ सुष्टुतीहुवेश्रृणो
तुनः सुभगा बोधतुत्मना ॥ सी० यत्वपः सूच्याछिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यो
३म् ॥ ये ३ हे राकां भूर्भुवः सुवर्यास्ते राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि
॥ ताभिर्नो अद्य सुमना उपागहि सहस्रपोषꣳ सुभगे रराणा ३ वौ ३ षट् ॥ सिनीवा
लिपृथुष्टुके या देवानामसि स्वसा ॥ जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नो ३म् ॥ ये ३
हे सिनीवालीं भूर्भुवः सुवर्या सुपाणिः स्वंगुरिः सुषूमा बहुसूवरी ॥ तस्यै विश्पत्नियै
हविः सिनीवाल्यै जुहोतना ३ वौ ३ षट् ॥ कुहूमहꣳ सुभगां विद्मनापसमस्मिन्य
ज्ञे सुहवां जोहवीमि ॥ सानो ददातु श्रवणं पितॄणां तस्यास्ते देवि हविषा विधेमो ३म् ॥

ये ३ यजामहे कुहूं भूर्भुवः सुवः कुहूर्देवानाममृतस्य पत्नी हव्यानो अस्य हविषश्चिकेतु ॥ संदा
शुषे किरतु भूरिवाम ँ रायस्पोषं चिकितुषे दधातु ३ वौ ३ षट् ॥ अग्निर्होतागृहपतिः स
राजा विश्वावेद जनिमाजातवेदाः ॥ देवानामुतयो मर्त्यानां यजिष्ठः सप्रयजतामृतावो ३
म् ॥ ये ३ हे ग्निं गृहपतिं भूर्भुवः सुवर्वयमुत्वा गृहपते जनानामग्ने अकर्म समिधा बृह
तं ॥ अस्थूरिणो गार्हपत्यानि संतु तिग्मेन नस्तेजसा स ँ शिशाधी ३ वौ ३ षट् ॥ इति प
त्नीसंयाजानिष्ट्वा पूर्ववदंक्ते अंगुलि पर्वणी तूष्णीमव घ्रायाप उपस्पृश्याज्येडामुप० हूयते
॥ उपहूत ँ रथंतर ँ० यइमं यज्ञमवान्ये यज्ञपत्नीं वर्धानुप० पुत्रे ॥ उपहूतेयं यजमानेंद्राणी
वाविधवादितिरिव सुपुत्रोत्तरस्यां देवयज्यायामुपहूता भूयासि हविष्करणमुपहूता दि० ये धा
मन्नुपहूते दं मे देवा हविर्जुषंतामिति तस्मिन्नुपहूता विश्वमस्याः प्रियमुपहूतं विश्वस्य प्रि
यस्योपहूतस्योपहूता ॥ इत्याज्येडां मंद्रस्वरेणोप० हूयते ॥ उपहूतां तूष्णीं प्राश्नाति ॥ आचम्य
॥ ऊर्ध्वं पिष्टलेपफलीकरणहोमाभ्यां ॥ वेदोसि वित्ति० सनेयं ॥ इति वेदं पत्न्यै प्रयच्छति ॥ तं वेदमादाय
॥ सव्येन धृत्वा ॥ घृतवंतं कुला० वाजिनं ॥ इति वेदं दक्षिणेनैव स्तृणन्नेति गार्हपत्यात्संततमाहव
नीयात् ॥ यथेतं प्रति निष्क्रामति. ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥ ६५ ॥.
जोशी कुलोत्पन्नेन अनंत सूनुना राजाराम शर्मणा लिखिता. ॥ शके १८०४ पुण्यपत्तनम्

इति हिरण्यकेशी दर्शपूर्णमास हौत्र समाप्तः ॥ छ ॥ छ ॥

रा० अ० जोशी.